## सिध्यतेरपारलौकिके। (४९/२६०२)

णौ [1]इत्यनुवर्तते। 'षिधु हिंसासंराध्योः (धा. पा. ११९३) इत्यस्य धातोः अपारलौकिकेऽर्थे वर्तमानस्य एचः स्थाने णौ परतः आकारादेशो भवति। अन्नं साधयति। ग्रामं साधयति। अपारलौकिके इति किम्? तपस्तापसं सेधयति। स्वान्येवैनं कर्माणि सेधयन्ति। अत्र हि सिध्यतिः पारलौकिके[2] ज्ञानविशेषे वर्तते। तापसः सिध्यति ज्ञानविशेषमासादयति, तं तपः प्रयुङ्क्ते। स च ज्ञानविशेषः उत्पन्नः परलोके जन्मान्तरे फलमभ्युदयलक्षण-मुपसंहरन् परलोकप्रयोजनो भवति। इह कस्मान् न भवति, अन्नं [3]साधयति ब्राह्मणेभ्यो दास्यामि इति? [4]सिध्यते-रत्रार्थो निष्पत्तिः। तस्याः प्रयोजनमन्नम्। तस्य[5] यद् दानं तत् पारलौकिकम्, न पुनः [6]सिद्धिरेव इति न आत्वं पर्युदस्यते। साक्षात् परलोकप्रयोजने च [7]सिध्यर्थे कृतावकाशं वचनम् एवं [8]विषयं नावगाहते। सिध्यतेः इति श्यना निर्देशः, 'षिध गत्याम्' (धा. पा. ४७) इत्यस्य भौवादिकस्य [9]निवृत्त्यर्थः॥

## मीनातिमिनोतिदीङां ल्यपि च। (५०/२६०८)

'आदेच उपदेशे' (६. १. ४५/२३७०) [10]इति वर्तते। 'मीञ् हिंसायाम्' (धा. पा. १४७७), 'डुमिञ् प्रक्षेपणे' (धा. पा. १२५१), 'दीङ क्षये' (धा.पा. ११३५) इत्येतेषां धातूनां ल्यपि विषये, चकाराद् [11]एचश्च विषये उपदेशे एव प्राक् प्रत्ययोत्पत्तेः अलोऽन्त्यस्य (१. १. ५२/४२) स्थाने आकारादेशो भवति। प्रमाता। [12]प्रमातव्यम्। प्रमातुम्। प्रमाय। निमाता। निमातव्यम्। निमातुम्। निमाय। उपदाता। उपदातव्यम्। उपदातुम्। उपदाय। उपदेशे एव आत्वविधानाद् इवर्णान्तलक्षणः प्रत्ययो न भवति। [13]आकारलक्षणश्च [14]भवति, उपदायो वर्तते। ईषदुपदानम् इति घञ्युचौ भवतः॥

## विभाषा लीयतेः। (५१/२६०९)

ल्यपि (६. १. ४१/३३३९) इति वर्तते, आदेच उपदेशे (६. १. ४५/२३७०) इति च। 'लीङ श्लेषणे' (धा.पा. ११४०) इति दिवादिः। 'ली श्लेषणे' (धा.पा. १५०२) इति क्र्यादिः। तयोः उभयोः [15]अपि यका निर्देशः स्मर्यते। लीयतेर्धातोः ल्यपि च एचश्च विषये उपदेशे एव अलोऽन्त्यस्य स्थाने विभाषा आकारादेशो भवति। विलाता। विलातुम्। विलातव्यम्। विलाय। विलेता। विलेतुम्। [16]विलेतव्यम्। विलीय।

[६६६] निमिमीलियां खलचोः प्रतिषेधो वक्तव्यः। (म. भा. ३. ३८)

ईषत् प्रमयः। प्रमयो वर्तते। ईषन्निमयः। निमयो वर्तते। ईषद् विलयः। विलयो वर्तते। अत्र तु लियो व्यवस्थितविभाषाविज्ञानात् सिद्धम्। एवं च प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्त्वं भवति, कस्त्वा-[17]मुल्लापयते, श्येनो वर्तिकामुल्लापयते॥

---

1. इत्येव क. 2. अर्थे इत्यधिकम् क. ड. ह. 3. साध्यते फ. 4. सिधेः क. ड. 5. च इत्यधिकम् क. 6. सिद्धेरेव क. 7. सिध्यतेरर्थे क. 8. विधं क. 9. निवृत्त्यर्थम् फ. 10. इत्यनुवर्तते क. 11. एचश्च नास्ति फ. 12. प्रमातव्यं नास्ति फ. 13. आकारान्तलक्षणः ग. 14. तु क. 15. अयं क. ह. 16. विलेतव्यम् नास्ति ड. 17. उपलापयति क. ग.